International Journal of Sanskrit Research 2018; 4(3): 26-29

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(3): 26-29
© 2018 IJSR
www.anantaajournal.com
Received: 10-03-2018
Accepted: 12-04-2018

**KY Revathi**
Ph.D Scholar, Dept. of Sanskrit
S.V. University, Tirupati,
Andhra Pradesh, India

**Correspondence**
**KY Revathi**
Ph.D Scholar, Dept. of Sanskrit
S.V. University, Tirupati,
Andhra Pradesh, India

# कथाकाव्येषु पञ्चतन्त्रस्य वैशिष्ट्यम्

**KY Revathi**

## संस्कृतवाङ्मय परिचय

संस्कृतभाषा देवभाषा इति कथ्यते। संस्कृतभाषायां मानवसंस्कृतेतिहासः सुरक्षितोऽस्ति। इयं भाषा अन्याभ्यः सर्वाभ्योऽपि भाषाभ्यः प्रकारे विस्तारे च महती, सौन्दर्यविचारपवित्रतायां चान्यूना विद्यते। भारते विविधानि सामाजिकपरिवर्तनानि, धार्मिकाण्युत्थानपतनानि, वैदेशिकानामाक्रमणानि च जातानि तथाऽपि संस्कृतं सर्वदा समभावेन सर्वत्र व्यवहारवर्त्मन्यवर्त्तत।

## संस्कृतसाहित्ये काव्यस्य स्थानम्

जगति सर्वत्र भारतीयानां विकासौन्नत्यं, भारतीयसंस्कृते वैभवं च या प्रकटयामास सा गीर्वाणी संस्कृतभाषा दैवी वाक् इति प्रसिद्धा। अपरेऽस्मिन् संसारे दुःखदावाग्निदग्धस्य आधिव्याधिप्रपीडितस्य, पापादिविषण्णस्य, मायामोहभ्रान्तचेतसि सुखप्राप्तये च विद्वद्धौरेयाः तत्वज्ञाः काव्यशास्त्रनामकरत्नं संस्कृतवाङ्मयमहोदधेः सारभूतम् उदधीरन्। रत्नमेतत् ब्रह्मानन्दसहोदरसममानन्दम् आस्वाद्यतयां जनयद् गौरवञ्च अलभत।

## काव्यवैशिष्ट्यम्

महर्षिवाल्मीकिप्रभृतिभिः कृतानि रामायणादिकाव्यानि लोकस्य सर्वस्यापि श्रेयः एव कुर्वन्ति। वाल्मीकिप्रभृतिमहर्षीणां पन्थानमाश्रित्य कालिदासादयः महाकवयः लोकोत्तरचमत्कारपरकाणि काव्यानि रचयामासुः। एतेषाञ्च प्रभावः ग्रन्थेषु महान् दृश्यते। काव्यं कान्तातुल्यम् उपदेशं प्रददाति। अर्थ – कीर्ति – व्यवहारज्ञानञ्च प्रददातीति काव्यस्य वैभवं स्पष्टं भवति।

## काव्येषु कथाकाव्यानां वैशिष्ट्यम्

लौकिकसंस्कृतं गद्यकाव्यस्य चरमोत्कर्षः मध्यकालिकगद्यकवीनां सुबन्धु – बाण – दण्डिनां रचनासु प्राप्यते। तदानीमेव गद्यकाव्यस्य कथा – आख्यायिकभेदयोः पृथगुदाहरणग्रन्थोऽपि निर्मितः। गद्यकविषु सुबन्धुरेव प्रथमः कविर्यस्य काव्यालङ्कृतशैल्यां निबद्धमुत्कृष्टं विरचते विरचनम्। संस्कृतवाङ्मये गद्यात्मककथानामुदयः विक्रमादपि प्रागभूत्। कात्यायनेन 4260 सूत्रस्य स्ववार्तिके आख्यानस्य आख्यायिकायाश्च पृथुगुल्लेखः कृतः। बृहत्कथायां पञ्चतन्त्रे तन्त्राख्यायिकायाञ्च कथाख्यायिकयोः यः उल्लेखः प्राप्यते तेन स्पष्टं प्रतीयते यत् गद्यकाव्यस्योद्भवो लोककथामाध्यमेनापि अभूदिति।

**कथाकाव्यानामुत्पत्ति**

कथाशब्दप्रयोगः अनेकेषु ग्रन्थेषु अलभ्यते - यथा रघुवंशे – "अभिमततप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु" इति, शिशुपालवधे अष्टमसर्गे त्रिचत्वारिंशत्तमे श्लोके "कथापि खलु पापानामलमश्रयसे यतः" इति उपलभ्यते। तथैव

**अभिज्ञानशाकुन्तले**

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः।
हुङ्कारेणैव धनुषः स हि निघ्नानपोहति।। [i]

**किरातार्जुनीये**

"कथाप्रसङ्गेन जनैरुदाहृता" [ii]

**रामायणे**

सनत्कुमारो भगवान् पुरा कथितवान् कथाम्।
भविष्यं विदुषां मध्ये तव पुत्र समुद्भवम्।। [iii]

**शब्दकल्पद्रुमे**

प्रबन्धे कल्पना प्रबन्धस्य अमिधेयस्य कल्पना स्वयं रचना इति सारसुन्दरी

**अमरकोशे**

"प्रबन्धकल्पना कथा।" [iv]

**शब्दकल्पद्रुमे**

"प्रबन्धकल्पनां स्तोक – सत्यां प्रज्ञा कथां विदुः"

**मनुस्मृतौ**

यद् यद् रोचेत विप्रेभ्यस्तत् तद् दद्यादमत्सरः।
ब्रह्मोद्याश्च कथाः कुर्यात् पितॄणामेतदीप्सितम्।। [v]

कथाशब्देन आख्यानस्य उपाख्यानस्य च आकलनं भवति स्म। तत्र स्वयं दृष्टवृत्तान्तस्य कथनमाख्यानमिति विष्णुपुराणे दृश्यते –

आख्यानैश्चाप्युपारण्यानैर्गाथाभिः कल्पशुद्धिभिः।
पुराणसंहितां चक्रे पुराणार्थविशारदः।। [vi]

**कथाकाव्येषु पञ्चतन्त्रस्य वैशिष्ट्यम्**

कथाकाव्यप्रपञ्चे पञ्चतन्त्रकाव्यस्य अतीव वैशिष्ट्यं विद्यते। अस्य पञ्चतन्त्रस्य लोकप्रिया, देशविदेशेषु प्रचारेण, प्रसारेण, विभिन्नभाषासु विभिन्नानुवादेन च एतस्य विभिन्नवचनानि सञ्जातानि येषु कानिचिद् विनिष्टानि अभवन्। यानि च उपलब्धानि सन्ति तेषां मूलरूपं तृतीयशतककालिकगुणाढ्यकृतबृहत्कथायां सुरक्षितमासीत्। पैशाचीभाषानिबद्धा बृहत्कथां विन्ध्यगिरिपरिसरे भ्रमन्ती विलुप्ताऽभवत्। अस्याः अद्भुतार्थबृहत्कथायाः कथानां संस्कृतरूपान्तरस्वरूपा क्षेमेन्द्रस्य बृहत्कथामञ्जरी विराजते, यस्याः आरम्भश्लोकद्वयेन एतद् रहस्यं समुद्धारितं भवति यथा –

सेयं हरमुखोद्गीर्णा कथाऽनुग्रहकारिणा।
पिशाचवाचि पतिता सञ्जाता विघ्नदायिनी।।
अतः सुख-निषेव्यासौ कृता संस्कृतया गिरा।
समां भुवमिवानीता गङ्गा श्वभ्रावलम्बिनी।। [vii]

बृहत्कथास्थितं मूलरूपमाधारीकृत्य पञ्चतन्त्रस्य विभिन्नानि वाचनानि अद्योपलभ्यन्ते।

पञ्चतन्त्रस्य विशिष्टानुसन्धाता जर्मन् विद्वान् डाँ. राजर्टन् महोदयः, डाँ. हर्टेल महोदयसहयोगेन महता परिश्रमेण एतत्सामग्रीं सङ्गृह्य अस्य निम्नलिखितानि वाचनानि निरदिशत्।

**1. तन्त्राख्यायिका**

कश्मीरोपलब्धपञ्चतन्त्रवाचनमाधारीकृत्य जैनपण्डितेन पूर्णभद्रसूरिणा पञ्चतन्त्रस्य संशोधितरूपं तन्त्राख्यायिकेति नाम्ना प्रकाशे आनीतम्। इयमेव कृतिः पञ्चतन्त्रस्य सर्वाधिकं मौलिकं रूपं प्रकाशयति।

**2. दक्षिणभारतीयपञ्चतन्त्रम्**

तमिलभाषानिबद्धेऽस्मिन् पञ्चतन्त्रे डाँ. राजर्टन् महोदयानुसारम् मूलपञ्चतन्त्रस्य गद्यस्य भागत्रयं, पद्यस्य च भागद्वयं सुरक्षितं वर्तते।

### 3. नेपालीय पञ्चतन्त्रम्
अस्मिन् पञ्चतन्त्रे केनापि सम्पादकेन पद्यभागः मूलग्रन्थात् पृथक् कृतः। गद्यभागश्च नष्टप्रायः। पद्यभागे दक्षिणभारतीयपञ्चतन्त्रेण साम्यं वर्तते।

### 4. पञ्चतन्त्रस्य हितोपदेशात्मक संस्करणम्
मित्रलाभ – सुहृद्भेद – विग्रह – सन्धिरूपात्मकेषु चतुर्ष्वेव भागेषु सरलसंस्कृतगिरा नारायणपण्डितेन सङ्ग्रन्थितः पञ्चतन्त्रस्य सङ्क्षिप्तरूपः हितोपदेशः कथासाहित्ये अतीव लोकप्रियतामादधाति।

### 5. पश्चिमभारतीयपञ्चतन्त्रम्
निर्णयसागरमुद्रणालयात् मुम्बई संस्कृत सीरीज् प्रकाशनाच्च प्रकाशितपञ्चतन्त्रे मूलपञ्चतन्त्रस्य स्वरूपं सुरक्षितं वर्तते इत्यामनन्ति मनीषिणः।

### 6. पञ्चाख्यानरूपं पञ्चतन्त्रम्
पूर्णभद्रनामकेन जैनमुनिना ख्रिष्टीय द्वादशे शतके पञ्चाख्याननाम्ना पञ्चतन्त्रस्य संस्करणं कृतम्। यच्च सरल पञ्चतन्त्रमित्यपि अभिधानं भजते। एतदेवाधारीकृत्य सप्तदशशतकोत्तरार्धे मेधविजयनामकेन जैनलेखकेन रचितः पञ्चाख्यानोद्धारनामकः नीतिकथामूलको ग्रन्थः उपलभ्यते।

### पञ्चतन्त्रस्य विश्वपरिभ्रणम्
पञ्चतन्त्रस्य विश्वभ्रमणवृत्तान्तः अतीव रोचकतामादधानः जिज्ञासुजनमानसे कौतूहलं जनयति।

अस्मिन् प्रसङ्गे पाश्चात्यविदुषा डॉं. बेनफीमहोदेन, डॉं हर्टेलमहोदयेन च कृतमनुसन्धानमतीव महत्त्वपूर्णं वर्तते। एतस्मिन्नेव सन्दर्भे डॉं. एजर्टन महाशयेन कृतं पञ्चतन्त्रस्य देशान्तरयात्रावर्णनं किमप्यपूर्वं वैशिष्ट्यं प्रदर्शयति। इदमवे विवरणमाधृत्य डॉं. काशीनाथमिश्रेण एतस्य मूलभागे विस्तरेण पञ्चतन्त्रस्य अनुवादद्वारा देशात् – देशान्तरे गमनं निर्दिष्टं तत् तत्रैव द्रष्टव्यम्।

अनेन विवरणेन विज्ञायते यत् पञ्चतन्त्रस्य पञ्चाशतोऽप्यधिकासु भाषासु अनुवादाः अभूवन्। तथा – शतद्वयादप्यधिकानि संस्करणानि इदानीं यावत् समभवन्। एतेन विश्वस्मिन् समस्तनीतिकथामूलकसाहित्यस्य उद्गमस्य आधारः पञ्चतन्त्रमेवेति निश्चीयते।

पञ्चतन्त्रस्य भाषा – शैली – सौष्ठवम्, कथाशिल्पसौन्दर्यसूक्तिरत्नम् इत्यादीनि सर्वाणि विस्तरेण मूलभागे प्रतिपादितानि निर्दिष्टानि च सन्ति।

### पञ्चतन्त्रस्य शैली
अस्मिन् ग्रन्थे न केवल मनुष्या एव अपि तु पक्षिणोऽपि परस्परं सदायारस्य नीतेः लोकव्यवहारस्य च विषयान् अङ्गीकृत्य व्यवहरन्ति। यत्र विनोदप्रियता एवं परिहारपूर्वकं जल्पनं सर्वत्र दृश्यते। ग्रन्थस्य भाषा प्राज्वला, सरला तथा लोकोक्तिपूर्णाऽऽसीत्। गद्यञ्च सुबोधं, सरलं लघुसमासादिकम्, तथा सरलः वाक्यविन्यासः चात्र दृश्यते। कथानकस्य वर्णनं गद्ये विद्यते। परं मध्ये मध्ये उपदेशात्मिकाः सूक्तयः पद्येषु दृश्यन्ते। पद्यानि च तानि महाभारतादि प्राचीनेभ्यः ग्रन्थेभ्यः उद्धृतानि सन्ति। वैदुष्ययुक्तेन चयनेन च कविना यथास्थानं पद्यानि तानि संयोजितानि। पञ्चतन्त्रस्य प्रभावः विश्वव्यापी विद्यते अस्यानुवादः पञ्चाशत् भाषासु इदानीं यावत् जातः।

### कथामुखम्
ग्रन्थानुसारेण दक्षिणात्ये जनपदे महिलारोप्य नाम नगरमासीत्। तत्र अमरशक्तिर्नाम कश्चित् नृपतिः बभूव। तस्य त्रयो मूर्खपुत्राः बहुशक्तिः, उग्रशक्तिः, अनन्तशक्तिश्चेति। तान् दुमर्दसस्तनयान् अवलोक्यातिचिन्तितो राजाऽऽसीत्।

> अजातमृतमूर्खेविभ्यो मृताजातौ सुतौवरं।
> यतस्त्वं स्वल्पदुःखाय यावज्जीवं जडो दहेत्।।
> वरं गर्भस्रावो परमृतुषु नावाभिगमनं।
> वरं जातः प्रेतो वरमपि च कन्यैव जनिता।।
> तरं वन्ध्या भार्या वरमपि च गर्भेषु वसतिः।
> न चाविद्वान् रूपद्रविणगुणयुक्तोऽपि तनयः।।

अमरशक्तिः आद्यावेव श्रेष्ठतरौ मन्यमानः पुत्राणां मूर्खताऽपारकरणाय सचिवानाहूय स्व दुःखं निवेदयामास। कार्यमिदं महत् कठिनं मन्यमानेषु सचिवेषु सुमतिर्नाम

सचिवो विष्णुशर्मणो नामकस्य सकलशास्त्रपारङ्गतस्य नो गुरुत्वेन राजपुत्रकुबुद्धिनिराकरणायानुशंसितवान्। प्रसन्नचित्तोऽमरशक्तिरचिरमेव विष्णुशर्माणम् आहूय स्वबाधां निवेदयामास।

यदि सर्वे मे पुत्राः बुद्धिमन्तो भविष्यन्ति शतं ग्रामाः त्वां योजयिष्यामीति नृपतिवचोऽनुसृत्य विष्णुशर्मा एवं जगाद "देव! श्रूयतां मे वचांसि। नाहुं विद्याविक्रयं ग्रामशतेन करोमि। पुनरेतान् तव पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान् न करिष्यामि तदा स्वनामत्यागं करिष्ये।

अशीतिवर्षस्य मे नास्ति किञ्चिदर्थप्रयोजनम् इति कथितवान् अथ राजपुत्राः तत्सकाशमुपदेशाय समर्पिताः।

विष्णुशर्माऽपि दुर्बोधान् राजतनयानादाय मित्रभेदमित्रसम्प्राप्तिकाकोलूकीयलब्धप्रणाशा-परीक्षितकारकाणि चेति पञ्चतन्त्राणि रचयित्वा षण्मासाभ्यन्तरे एव तान् पाठयित्वा नीतिशास्त्रपारङ्गतान् कारयामास। ततः प्रभृत्येव पञ्चतन्त्रमिदं बालावबोधनाय पृथिव्यां प्रवृत्तमासीत्।

**सन्दर्भग्रन्थसूची**


1. संस्कृत-वाङ्मय का बुहद् इतिहास, प्रो. जयमन्त मिश्र, उत्तरप्रदेश संस्कृत संस्थान लखनऊ
2. अभिज्ञानशाकुन्तलम्, शिवकामेश्वरीग्रन्थमाला, विजयवाडा
3. रघुवंशमहाकाव्यम्, चौखाम्बा कृष्णदास अकादमी, वाराणसी
4. कुमारसम्भवमहाकाव्यम्, चौखाम्बा कृष्णदास अकादमी, वाराणसी


पाठस्य टीप्पण

[i]. अभिज्ञानशाकुन्तलम् – 3-1

[ii]. किरातार्जुनीयम् – 1-24

[iii]. श्रीमद्रामायणम् – 1- 8-6

[iv]. अमरकोषः - 1-6-6

[v]. मनुस्मृतिः – 3-231

[vi]. वि.पु. – 3-6-15

[vii]. बृहत्कथा पीठिका